बृ॰उ॰ “अनेनात्मना मनसा आत्मन्वी मनस्वी स्याम्” भा॰ स्वरूपे” अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति” छा॰उ॰। जीवात्मनि “आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च। इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्। आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः” कठ॰उ॰। “अत्रात्मानं संसारिणं रथिनं रथस्वामिनं विद्धि”भा॰। बुद्ध्यादौ “इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः। मनसश्च परा बुद्धि बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः। एष सर्व्वेषु भूतेषु गूढ़ोत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः। यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति यच्छेत्तद्यच्छेच्छान्त आत्मनि” कठ॰उप॰ “ज्ञाने प्रकाशस्वरूपे बुद्धावात्मनि बुद्धिर्हि मनआदिकरणानि प्राप्नोतीत्यात्मा तेषां प्रत्यग्ज्ञानम्। बुद्धिमात्मनि महति प्रथमजे नियच्छेत् प्रथमजत्वात् स्वच्छस्वभावमात्मनो विज्ञानमापादयेदित्यर्थः। तञ्च महान्तमात्मानं यच्छेच्छान्ते सर्वविशेषप्रत्यस्तमितरूपे अविक्रिये सर्व्वान्तरे सर्व्वबुद्धिसाक्षिणि मुख्ये आत्मनि”भा॰ तत्र पुत्रादौ आत्मशब्दोगौणः ममात्मा भद्रसेन इतिवत् देहादौ तु मिथ्याभिमान इति भेदः एतदभिप्रायेणैव “गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनादिति”शा॰ भा॰ उक्तम्। परमात्मनि “तस्माद्वा एतस्मादात्मनः आकाशःसंभूतः”। “आत्मा वा अरे द्रष्टव्यः” इति च श्रुतिः स्वरूपे तदात्मा पृथगात्मा “आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते” वाक्यप॰। बुद्धिविशेषस्यधर्म्मोपलक्षितार्थे स्वशब्दार्थे “ग्रामेष्वात्मविसृष्टेषु” रघुः “देवात्मशक्त्या स्वगुणैर्निगूढाम्” श्रुतिः। भावे त्व आत्मत्वम् आत्मधर्मे न॰। “अभावविरहात्मत्वं वस्तुनः प्रतियोगिता” उदयनः। तल् तत्रैवार्थे स्त्री ‘तदात्मताध्यातधवा रते च का” नै॰। ष्यञ् टिलोपः। आत्म्यम् तत्रार्थे न॰। हितार्थे ख। आत्मनीनः आत्महिते त्रि॰। तस्येदं छ आत्मीयः। तत्सम्बन्धिनि त्रि॰। गूढात् परत्वेऽस्य पृ॰ वर्णविकृतौ गूढोत्मा “गूढोत्मावस्य विकृतेरिति” व्या॰ कारिका “गूढोत्मा न प्रकाशते” इति कठ॰उप॰। स्वात्मनः प्रत्यक्त्वं, परात्मनः पराक्त्वमिति भेदः तयोर्भेदाभेदपक्षौ च मदभेदेन प्राक् दर्शितौ।

**आत्मनिष्ठ** त्रि॰ आत्मनि आत्मज्ञाने निष्ठा यस्य। आत्मज्ञानमात्मान्वेषिणि ब्रह्मनिष्ठे मुमुक्षौ।

**आत्मनीन** त्रि॰आत्मने हितम् ख। १आत्महिते “तामात्मनीनामुदवोढ रामः” भट्टिः। “अद्यापि नैवात्मनीनं कृतं कर्म यातं जनुः” नीतिः २पुत्रे ३ श्याले नाटकप्रसिद्धे विदूषके च पु॰ अजयः ४ प्राणधारके बलिनि त्रि॰।

**आत्मनेपद** न॰ आत्मने आत्मार्थफलबोधनाय पदम् अलुक् स॰। आत्मगामिफलबोधके व्याकरणप्रसिद्धे तङादौ। “तङानावात्मनेपदम्” पा॰ “अनुदात्तङित आत्मनेपदम्”। “स्वरितञितः कर्त्रभिप्राये क्रियाफले” पा॰ उक्तेः आत्मगामिन्येव क्रियाफले तत्पदस्य विधानात् तथात्वम् तङ् प्रत्याहारः स च “तआतां झयास् आथांध्वम् इड् वहिमहिङ्” पाणिन्युक्तः” एतेषां स्थाने एव लकारभेदे तत्तद्रूपाणि आदिष्टानि।

**आत्मनेपदिन्** पु॰ आत्मनेपदं विहितत्वेनास्त्यस्य इनि। पाणिन्युक्ते धातुभेदे ते च गणपाठे अनुदात्तेतोहलन्ताः स्वरान्तङितश्च पठिता धातवः। एवमन्येऽपि धातवः स्वरितेतोञितश्च कर्त्रभिप्राये क्रियाफले एव तथा अर्थविशेषे उपसर्ग विशेषयोगेन कर्त्तरि वाच्ये चात्मनेपदिनोऽपि भवन्ति ते च पाणिन्यनुशिष्टाः संक्षिप्य आशुबोधेऽस्माभिर्दर्शिताः यथा। “विपराभ्यां परस्माच्च जयतेरात्मनेपदम्। परिव्यवेभ्यः क्रीणातेस्तङ् स्यात् कर्त्तरि नेर्विशः। आङो दोऽस्यविस्तारे शपथे शपतेर्भवेत्। पर्य्यन्ववाङः क्रीडः स्यादकूजार्थाच्च तङ् मतः। आङो नीतेः पृच्छतेश्च क्षमायामागमेर्भवेत्। नाथतेराशिषि भवेत् जिज्ञासायाञ्च शिक्षतेः। हर्षात् भक्षान्नवासाय लेखनार्थात् किरस्तु तङ्। उपात् कर्त्तरि सुट् तस्य चतुष्पादेऽथ पक्षिणि। प्रतिज्ञायां, निर्णयार्थमाश्रये,ऽभीष्टबोधने। वर्त्तमानाच्चिष्टतेस्तङ् तथा कर्मविवर्ज्जितात्। देवपूजासंगमयोर्मैत्रीमार्गगतौ तथा। उपात्तङ् तिष्ठतेश्चैव मन्त्रसाधनकाच्च तङ्। तथा संप्रपरिभ्यःस्थ उदश्चानूर्द्धकर्म्मणि। स्वाङ्गकर्माकर्म्मकात् तङुद्भ्यां तपतेर्भवेत्। हनो यमस्तथाभूतादाङः कर्त्तरि तङ् भवेत्। समः कर्म्माविवक्षायां गम्यर्च्छिस्रुदृशो भवेत्। उपसर्गादस्यतेस्तङूहतेश्च विभाषया। निसंव्युपेभ्यो ह्वयतेः स्पर्द्धायामाङ एव तङ्। सूचने, भर्त्सने, दुष्टे—सहसैव प्रवर्त्तने। सतो गुणान्तराधाने, सेवायां विनियोजने। कथने च कृञस्तङ् स्यादधेस्तु सहने तथा। वेः शब्दकर्मणस्तस्मात् कर्मणा र॰